कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

1

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ ओषधीपतिनेत्राय पद्मि-
नीपतिमूर्तये ॥ कालकालायनीलाय पार्वतीपतये नमः ॥ १ ॥ गर्भभारपरिक्लिष्टा कन्या
मंदोदरी शुभा ॥ रावणं परिपप्रच्छ प्रज्ञाने तुष्टमानसं ॥ २ ॥ मंदोदर्युवाच ॥ स्वामिन्दे-
वासुराराध्य चतुर्वेदविशारद ॥ सदाशिवाहात्मकाम भुवनत्रयपालक ॥ ३ ॥ यदासु-
क्रममोघं ते पदारभ्यादरे स्थितं ॥ तदारभ्य न शक्नोमि कर्तुं चंक्रमणं मनाक् ॥ ४ ॥ दुःखं
रोगाश्च कालश्च त्वत्प्रसादान्न नागमि ॥ रक्षोगणा न स्पृशंति तेषां पीडा कथं मम ॥ ५ ॥
उपायं ब्रूहि मे नाथ गर्भक्रियास्तु यथोचितं ॥ यथा विवर्धते गर्भो बलं च मम जायते ॥ ६ ॥
रावण उवाच ॥ एकदा तु मया पृष्टा पार्वती प्रीतमानसा ॥ उमे त्वं तु जगन्माता त्वद्दे-
होद्भवाः सुताः ॥ ७ ॥ कथं नास्ति गणेशाद्या मादृशास्तव बालकाः ॥ अनूढा एव तिष्ठंति
कारणं ब्रूहि मे शिवे ॥ ८ ॥ देव्युवाच ॥ कामिन्यनंगनाशाय जायंते बालकाः सुताः ॥
भार्यापि क्लिष्टा भवति तरुण्यापि सुते सति ॥ ९ ॥ एवं सदाशिवं रंतुं सदैवाहं कुमारिका ॥
गणेशस्कंदनंद्याद्याः कल्पिता मानसाः सुताः ॥ १० ॥ रावण उवाच ॥ नमोस्तुभ्यं च मे धि-

Accession No:- ~~219~~ ~~1108~~ M1293

Title:- ~~प्रमाणरत्नमाला~~ अर्कप्रकाश

Subject:- [illegible] ओषधी (medicine)

Author:- [illegible] रवण।

~~पत्रे~~ - 74

K K S U LIBRARY
RAMTEK
441 106
M-1293
Dist. Nagpur

(1)

Checked 2012

कृधिक्संसाराकृष्टचेतसः॥विवाहंचकरिष्यामिग्रसहंस्यांकुमारवत्॥११॥इतिमद्व
चनंश्रुत्वापार्वतीवाक्यमब्रवीत्॥निर्विस्मोभवमापुत्रकुरुराज्यंचिरंस्थिरं॥१२॥मया
सहकृतेप्यार्यविष्णुपरमात्मनिचंचला॥त्वयावध्यासमानेपास्थाप्यासावंदिनारिवन॥१३॥
नयोन्मत्ताःसुराःसर्वेनिर्जितष्यावहाबलाः॥ममप्रकृतिदेहस्यरोमभ्यःशतशोभवत्
॥१४॥औषध्यस्तद्बलादेवतंविश्वंजयबालक॥इमुक्त्वामामकथयत्पार्वतीमहिमानकं॥
॥१५॥दिव्योषधीनांतद्रहस्यंवक्ष्यामिशृणुवत्स॥औषधीनांदिव्यकल्पमायुरारोग्यव
र्द्धये॥१६॥औषधः पंचधाख्यातालतागुल्माश्चशाखिनः॥पादपाश्चसराश्चैतितेषांव
क्ष्यामिलक्षणं॥१७॥गुडूच्यादिलताप्रोक्तागुल्माःपर्पटकादयः॥आम्राद्याःशाखिनो
ज्ञेयावटश्चत्थादिपादपाः॥१८॥कंटकार्यादिकाःसर्वेप्रसराइतिकीर्तिताः॥तासांपंचे
वचिह्नानिसबलानियथाक्रमं॥१९॥पत्रंपुष्पंवल्कलंचफलंमूलंचक्रमेणच॥अनूकेमू
लमेतस्यान्मुख्यमंगमथोच्यते॥२०॥नालीसादेस्तुपत्राणिसुमनंधानकीमुखात्॥अम्ब
ष्ठादेस्त्वचोग्राह्याफलंस्यात्त्रिफलादिकाः॥२१॥पंचांगुलादेर्मूलानिअनुक्तेपरिकल्प

2

येत्॥ खदिरासनकादीनां सारो पि परिगृह्यते॥२२॥ रसो गुणस्तथा वीर्यं विपाकः शक्ति
२ रेव च॥ पंचानां यः समाहारस्तद्द्रव्यमिति कीर्तितं॥२३॥ स्वाद्वम्ललवणास्तिक्तः कटुकश्च कषा
यकः॥ अमी तु षड्रसाः ख्याता निर्बलोत्र परस्परः॥२४॥ मधुरः पिच्छलः शीतो धातुस्तन्य बल
प्रदः॥ चक्षुष्यो वातपित्तघ्नः कुर्यात्स्थौल्यमलकृमीन्॥२५॥ आम्लोष्णोनबृंहिः शीतो रुच्यः पि
त्तकफास्रदः॥ विबंधानाहदृष्टिघ्नो दंताष्टिभ्रूनिकोचनः॥२६॥ लवणः शोधनो रुच्यः पाचनः क
फपित्तदः॥ पुंस्त्वावातहरः कायः शैथिल्यमृदुकारकः॥२७॥ तिक्तः शीतः स्तृषामूर्छाज्वरपित्त
कफान्जयेत्॥ रुच्यः स्वर्णमरोगस्तु कंवास्तेन्यास्यशोधनः॥२८॥ कटुरूक्षसतन्येमेदःश्लेष्मकं
कु उविषापहः॥ वातपित्तकृदाग्नेयः शोषी पाचूरोचकृत्॥२९॥ कषायो रोपणो ग्राही स्तंभनः
शोधनो हिमः॥ कफशोणितपित्तघ्नो जिह्वाजाड्यकरो लघुः॥३०॥ गुरुः स्निग्धः स्तीक्ष्णरूक्षो
लघुरेते गुणाः स्मृताः॥ पंचभूतेषु तिष्ठंति आधिक्यादुपलक्षयेत्॥३१॥ गुरुर्वातहरं पुष्टि
श्लेष्मकृच्चिरपाकि च॥ स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहं॥३२॥ तीक्ष्णं पित्तकरं प्रायो
लेखनं कफवातहृत्॥ रूक्षं समीरणकरं परं कफहरं मतं॥३३॥ लघु पथ्यं परं प्रोक्तं कफघ्नं २
चिरपाकि च॥ पृथिव्यादिगुणाधिक्याद्गुणं द्रव्ये प्रकल्पयेत्॥३४॥ उष्णं शीतं द्विधा वीर्यंतिका

③

लादुष्टत्वस्येन्॥ स्थलादपित्तयोर्वेगाद्योगान्मध्यमंतुतत्॥३५॥ सर्वंजांगलसंभूतंप्रा
योभवतिवातहृत्॥ आनूपसंभवंसर्वंप्रायःकफहरंभवेत्॥३६॥ तत्कालोष्णंदक्षिणजंपरिणा
मेतुशीतलं॥ धनदाशासमुद्भूतंविपरीतंतुतत्स्मृतं॥३७॥ अंतर्वेदीभवंसर्वंपथ्योक्तगुण
माद्दिशोत्॥ विपाकस्तुत्रिधाप्रोक्तःस्वाद्वम्लकटुकाभिधः॥३८॥ क्रमाद्धीनबलोज्ञेयो
मधुरोमधुरःकटुः॥ पचत्यम्लोम्लमितरेरसाःकटुकपाकिनः॥३९॥ श्लेष्मकृन्मधुरःपा
कोवातपित्तहरोमतः॥ आम्लस्तुकुरुतेपित्तंवातश्लेष्मगदापहः॥४०॥ कटुःकरोतिपवनं
कफंपित्तंचनाशयेत्॥ विशेषल[illegible]रसतोविपाकानांनिदर्शितः॥४१॥ रसादिसाम्येयत्कर्म
विशिष्टंत[illegible]प्रभावजं॥ दंतीरसेनतुल्यापिचित्रकस्यविरेचनी॥४२॥ मधुकस्यमृद्वीका
घृतंक्षीरस्यदीपनं॥ प्रभावस्तुयथाधात्रीलकुचस्यरसादिभिः॥४३॥ समोपिकुरुतेदोष
त्रितयस्यविनाशनं॥ क्वचित्तुकेवलंद्रव्यंकर्मकुर्यात्प्रभावतः॥४४॥ ज्वरंहंतिशिरोबध्वा
सहदेव्याजटायथा॥ धत्तानिवारमेल्लोहंपुष्प्यार्केकालमूलिका॥४५॥ द्रव्यकल्कःपंचधा
स्यात्कल्कचूर्णरसास्तथा॥ तैलमर्कःक्रमाज्ज्ञेयंयथोत्तरगुणंप्रिये॥४६॥ पृथक्द्रव्येसंनि
पानेसंकरसोध्यरोगिषु॥ क्रमादेनेप्रयोक्तव्याअरुजानविनाशकाः॥४७॥ अरोगुणागु

णाःसर्वेद्वितीयंचयत्नेनोलघु॥तृतीयंशीघ्रकारीस्याच्चतुर्थंनातिदोषकृत्॥४८॥पंच
२ मंदोषरहितंगुणसंघप्रकाशकं॥पंचमस्यतुसामर्थ्यंस्वयंपंचाननोब्रवीत्॥४९॥वर्षा
णांतुसहस्राणिकथ्यतेहर्निशंमया॥संपूर्णानिवजायेतकल्पार्कस्यदर्शनं॥५०॥पुंवा
रेपुरुषक्षेत्रेचदिवाकीयस्तुनिर्मितिः॥रमणीषुप्रदातव्याविलोमात्पुंसुयोजयेत्॥५१॥लो
हचूर्णंगैरिकंचस्फटिकाभ्रष्टमृत्तिका॥मृत्तिकास्थिभवंचूर्णंकाचंकीकसजंरजः॥५२॥
एतानिसमभागानिसमतुल्याचमृत्तिका॥भंशानीयापंचमूत्रेगवांचमहिषोद्भवे॥
॥५३॥गजानसंभवाभ्यांचशठितंनद्विशोषयेत्॥यथागंधविनाशस्यात्तच्छ्लक्ष्णामर्दये
त्नतः॥५४॥लघुहस्तःकुलालोस्यकुर्याद्घटंतुनिर्मलं॥यथेष्टांस्थालिकांकुर्याद्व्यंगुलत्प्रां
तसारिकां॥५५॥पृथुबुध्नोदराकारांद्व्यंगुलोत्सेधवेष्टनीं॥सारिकांतेतुपरिधिंत्र्यंगु
लोत्सेधत्तोभितां॥५६॥विनिर्माययाथसार्पंतेयथाशिल्पविनिर्मितं॥छिद्रंकुर्यात्तलेद
याद्व्यंगुलसमंसुधीः॥५७॥सारिकापरिधेरंतस्तस्यकुर्यात्पिधानकं॥अर्धनिंबुफ २
लसमंपरिधिंतस्यचांगतः॥५८॥वेदांगुलंमस्तकोर्ध्वंकार्यंतापस्यधारणे॥सामर्थ्यं

तत्र नलिकां कुर्यात्तोयविमोचनीं ॥५९॥ तस्यैवांतरतो लाप्य जीर्णास्थां मृत्तिकाघनां ॥ अथ
वा श्वेतकाचं च सर्वदोषापनुत्तये ॥६०॥ अथ वक्ष्येथ जीर्णास्थिमृत्तिकाकरणं प्रिये ॥ शीता
जंतुस्थले कुर्याद्दीर्घं गर्तं मनोहरं ॥६१॥ निक्षिपेत्तत्र नानास्थिसंचयं द्विचतुष्पदां ॥ सर्जिक्षा
रं महाक्षारं मृत्क्षारं लवणानि च ॥६२॥ गंधकं कोष्णजलं सेप्यं नानामूत्राणि तत्र च ॥ एवं कृत्वा
मासषट्कद्यासाषाणमृत्तिकां ॥६३॥ कूकास्पूर्ध्वं तदूर्ध्वं तु कुर्याद्दृष्टिकां शुभां ॥ त्रिवर्षा
जायते सेंद्वमेकीभूतं दृषत्समं ॥६४॥ ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्मितं ॥ प्रशा
स्तं भोजनं तत्र सूचयेद्दंभ्रदूषणं ॥६५॥ महाविषस्य संयोगात्तस्य भं[illegible]गः प्रजायते ॥ दूषी
विषादिसंयोगात्सात्रे स्फोटा भवंति च ॥६६॥ तत्र क्षिप्तं क्षुद्रविषपात्रं कृष्णं प्रजायते ॥ एवं कृ
त्वा तत्र दद्याभ्रकद्राचिद्दूषादिकं ॥६७॥ विषादीनामकं सिध्येकुर्यात्पात्रं तु रोहजं ॥ स्वर्ण
जं रौप्यजं वापि कुर्यात्सात्रं अकल्मषं ॥६८॥ अथवा ताम्रजं कुर्याद्दंतवंगविलेपितं ॥ पात्रं
तु बुध्या कुर्वीत कषायो न भवेद्रसः ॥६९॥ द्रव्यांतरस्य संयोगाद्वकलौलं च गर्भिणी ॥ सर्वेषां
निसरत्सेव पाषाणस्यापि किं पुनः ॥७०॥ अनग्न्यर्कस्तथा तैलं गंधतालादिसंभवं ॥ वेध

का०
४

प्र० प्र०

कंसर्वधातूनांदेहस्यापिचसिद्धिदं॥७१॥ पक्तौलकरणेदक्षसोर्कःनिःसारणक्षमः॥
ततोसेवाकरोति यंसरोगनैवबाध्यते॥७२॥ कुत्सितार्कस्तुयामेनद्वियामाभ्यांतुम
ध्यमा॥ त्रिभिर्यामैर्भवेच्छ्रेष्ठः अधमर्कस्तुसिद्धिदः॥७३॥ द्रव्यादधिकसौगंध्यंप
रिमन्नर्केप्रशस्यते॥ जीर्णास्थिपात्रसंक्षिप्ताद्रव्यवर्णःप्रदृश्यते॥७४॥ शंखकुंदेंदुध
वलोन्यथापात्रान्तरेस्थितः॥ जिह्वापरिगतस्वादुद्रव्याद्रव्यभवंतुयः॥७५॥ तमेवार्कं
विजानीयादन्यन्नैपरसादिवत्॥ कृत्वासुगंधंदुर्गंधिमर्कंपुष्पादिभिःसुधीः॥७६॥
गुणायपश्चात्सेवेतत्वन्यथाप्यगुणोभवेत्॥ दुर्गंधिंभक्षयेदर्कंयदिमोहात्कथंचन॥
॥७७॥ तदास्यजायतेग्लानिर्वांतिरालस्यकंतृषा॥ तद्दोषस्यविनाशायकुर्याद्वांति
मतंद्रितः॥७८॥ द्वीपोद्भवरसस्तानांपिबेदर्कपलंजनः॥ चंपेत्यर्कपलंवापिशीतान्नैर्मा
लतीभवं॥७९॥ अर्कनिष्कासनार्थायपक्रमाह्येयाषडग्नयः॥ धूमा[illegible]श्चैवदीपाग्निर्मं
दाग्निर्मध्यमस्तथा॥८०॥ खद्विगाग्निभृआग्निश्चतेषांवक्ष्यामिलक्षणं॥ विस्त्रालो
पोधूमशिखोधूमाग्निःसउदाहृतः॥८१॥ ससादमग्निमुष्कयत्रमुष्टेमध्येसमेष्य

ग्नि
४

⑦

ति ॥ न काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवं ॥ ८२ ॥ द्वाभ्यां तस्य चतुर्थाभ्यां योग्नि
र्दीप्याग्निरुच्यते ॥ चतुरंशेन तेनैव मंदाग्निः परिकीर्तितः ॥ ८३ ॥ आर्द्रीकृताभ्यां द्वाभ्यां तु
मध्यमाभ्यां ग्निरुदाहृतः ॥ अधैस्तैः पंचभिः प्रोक्तः खराग्निः सर्वकर्मसु ॥ ८४ ॥ मत्स्यको
वधिपात्रस्य चतुर्दिक्षु क्रमेण च ॥ प्रसरंति यदा ज्वालास्स भद्राग्निर्दीरितः ॥ ८५ ॥ जी
र्णस्य पात्रे गर्त्तरूपादृर्क्वा कान्तसंभवे ॥ पाषाणसंभवे पात्रे कांस्यजे वा हिमस्थले
॥ ८६ ॥ साधयामं चयामौ च याममेकं मुहूर्तकं ॥ मुहूर्त्तमात्रमित्येवमकथयिव कृपः स्मृ
तः ॥ ८७ ॥ अतिवीर्यं पिबेदर्कं पीत्वा नांबूलभक्षणं ॥ कुर्याद्दिनुक्त नांबूलोह्न वंगभस्मये
त्वत्वं ॥ ८८ ॥ मर्दनादिषु सर्वत्र द्रव्य तैलं प्रयोजयेत् ॥ अर्क एव प्रयोक्तव्या भक्षणे न तु
मर्दने ॥ ८९ ॥ ये ये द्रव्यगुणाः प्रोक्ताः सर्वे तेर्कसमाश्रिताः ॥ सर्वेनादेव प्रियेन समाद्राजाप
रमेधार्मिकैः ॥ ९० ॥ स्वस्थाय वा रोगिणे वा यायान्यं न कस्तु येन वा ॥ ज्ञात्वा नलक्षणं दद्या
द् न्यथा ब्रह्महा भवेत् ॥ ९१ ॥ वर्णस्वराणां प्रभिन्नं द्विकं कस्य तु कारयेत् ॥ एकयुक्ता
द्विगुणिता त्रिभिर्भागैः समाहरेत् ॥ ९२ ॥ एकशेषं गुणं त्रीणि धुंद्धि शेषं वधं तिगदः ॥ त्रि

५

शेषमरणं वाच्यं स्वार्थया चयत्नेपदि ॥१३॥ अर्कतंद्रैनद्धि स्तापदद्याद्दर्कं न चान्यथा
॥ गदिना वय दूतः शेषितश्चेद्धि चार्पते ॥१४॥ नपुंसकां स्त्रैस्त्र नास्तु स्वराएका
दशाप्रिये ॥ वर्णास्ते त्संख्यकालेख्याक टबाधाश्च नत्तले ॥१५॥ एकाद्दशाप्रकोष्टेनु
क्रमादंस्तान्प्रविन्यसेत् ॥ रसास्तिस्रो द्वयं वेदाः पर्वता ऋतवः कृताः ॥१६॥ बहुयः पृ
थिवीभूत्न्यं चंद्रमा इति चक्रमात् ॥ विहाय जीवं दूतस्य नामांकाक्षरयोजनं ॥१७॥
एवमेवानुरेकृत्वा द्वयोरष्टावशेषितं ॥ कृतांकयोगं गदिनोधिके शेषे शुभं भवे
त् ॥१८॥ समशेषे दीर्घरोगान्युनशेषे नु
मृत्यतिः ॥ एतद्धि चार्पदातव्यमन्यद्द्यौष
धं बुधैः ॥१९॥ चक्रद्वयं नुषेक्षातादद्यादर्कं
विमोहिनः ॥ जापत्रैवं पराल स्वयद्दासोपि
मृतेसति ॥२०॥ इति लंकानाथरावणकृतार्क
चिकित्सायां अर्कनिष्काशविधिप्रथमं रात्नं ॥

६	३	२	४	७	५	४	३	२	०	१
अ	आ	इ	ई	उ	ऊ	ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह

५

॥अथातः संप्रवक्ष्यामि निर्गमोर्कस्य भामिनी॥ पंचप्रकारद्रव्यस्य कुर्यान्निष्कात्रा
नं भिषक्॥१॥ असंतकठिणं चाद्यं कठिणं च द्वितीयकं॥ आर्द्रं तृतीयमुद्दिष्टं चतुर्थं
बुल्बुलं भवेत्॥२॥ पंचमं द्रवद्रव्यं च तेषां विधिरथोच्यते॥ सर्वं तु चूर्णयेद्द्रव्यमसंत
कठिणं तु यत्॥३॥ द्विगुणे निक्षिपेत्तोयं छायायां स्थापयेच्च तत्॥ यावच्छुष्कं भवेत्तो
यं द्रव्यं च शिथिलं यथा॥४॥ ततः पुनः क्षिपेत्तोयं पूर्वद्रव्यसमं भिषक्॥ कृत्वाष्टप्रह
रं तत्तु सूर्यचंद्रकरैरलं॥५॥ संपूज्य गणपं सर्यं भैरवं कुलदेवतां॥ निक्षिपेदर्कयंत्रे तत्
क्षिप्त्वास्यार्कं समाहरेत्॥६॥ वर्षाधिकं तु यद्द्रव्यमसंतकठिणं तु तत्॥ चंदनादीनि स
र्वाणि असंतकठिणानि च॥७॥ कीटैर्भुक्तं घुणैर्घृष्टं यच्च गंधविवर्जितं॥ रहितं सुरसे
नापि नार्कं कर्मणि योजयेत्॥८॥ यथार्कसंस्थितं द्रव्यं कुर्याद्द्रोकुं तथा पुनः॥ अर्केगरु
णभेषज्यं तस्मात्संयोजयेत्प्रिये॥९॥ यवान्यजाउडी त्रिकटु भूनिंबादिकमौषधं॥ ज्ञेयं
तत्कठिणं द्रव्यं तदर्कस्य विधिं शृणु॥१०॥ द्विगुणं निक्षिपेत्तोयं द्रव्ये तु कठिणे भजेत्॥
अष्टप्रहरिकं तच्च कुर्यात्सिर्यापमेककं॥११॥ रक्ते द्रव्यं द्विगुणितं दष्वादद्रोतु कोतुकं॥

पश्चाद्दत्वार्कपत्रेण तु अर्कं निष्कासयेच्छनैः ॥१२॥ आर्द्रद्रव्यं द्विधा प्रोक्तं सरसं नीर
सं तथा ॥ सदुग्धं गुप्तरसकं द्विधा नीरसमुच्यते ॥१३॥ वास्तुकं सार्षपं शाकं निर्गुं
डं माषकं ॥ धत्तूराद्यमिदं सर्वमार्द्रं सरसमुच्यते ॥१४॥ एषां नालां चूर्णयित्वा दिशां
त्रीं निक्षिपेज्जले ॥ मुहूर्तमुष्णं संस्थाप्य ग्राह्याकैर्विबुधोत्तमैः ॥१५॥ पत्राणां तु शतां
शेन तुल्यतोयेन सेचयेत् ॥ दद्याद्दुरोमकर्करांतनार्कं कलयेच्छनैः ॥१६॥ वटाश्वत्थकरी
राद्यमार्द्रद्रव्यं च नीरसं ॥ विंशांशं निक्षिपेत्तोयं पलं घर्मे च धारयेत् ॥१७॥ ततो निष्कास
येदर्कं क्रमवृध्याग्निना क्वथेत् ॥ सदुग्धं तु द्विधा प्रोक्तं मृदुतीक्ष्णमिति क्रमात् ॥१८॥ सातु
ला वज्रसहुंड सोरिण्याद्या सुतीक्ष्णकाः ॥ खंडानि तेषां कृत्वाथ निक्षिपसुष्ठके जले ॥१९॥
दिनत्रयं च निष्कास्य तोयाद्दृषु चकुदृषयेत् ॥ तदा न दत्तस्य तद्दुग्धं दद्यात्तोपरदांशकं ॥२०॥
निष्कासयेच्छनैरर्कं सतुतीक्ष्णार्कसंज्ञकः ॥ दुग्धिकाक्षीरिण्याद्याश्च मृदुदुग्धाः प्रकीर्ति
ताः ॥२१॥ जले चतुर्गुणे दद्यात्तानु घर्मे विनि वेशयेत् ॥ यावज्जलेस्याद्वर्णत्वस्या ततोयं
त्रे विनिक्षिपेत् ॥२२॥ आद्यविषचूर्णयित्वामष्टांशं जलसंयुतं ॥ एवं द्रव्यं लक्षयित्वास्व

पुत्रकार्कं विनिर्हरेत् ॥२३॥ खंडीकृतानां च आमानां फलानां मृदुकायिनां ॥ सरसा
नां च गृह्णीयाद्दर्कं त्वेन वर्जितं ॥२४॥ काष्ठोदुंबरिकादीनां मोमानां दार्घ्यभागिनां
॥ कृतानां त्वक्स्थानि खंडानि ज्ञातानां च प्रदापयेत् ॥२५॥ पृथक् पृथक् चतुर्वर्ग सर्जि
क्षारं च सैंधवं ॥ दत्वौ विमर्द्य पित्लसं चतापर्त्रांशकं जलं ॥२६॥ स्विन्नान्न फलस्यर्धमे
यामार्धे नोष्णता भवेत् ॥ ततो यंत्रे पतन् दत्वा गृह्णीयाद्र्कमुत्तमं ॥२७॥ अग्निपक्वफ
लानां तु वीर्यं तो चार्कमाहरेत् ॥ पुष्याकार्धं वीध्रांगं जलं पुष्पेषु दापयेत् ॥२८॥ ब
हुवारफलादीनि चिल्हकोदीनि यानि च ॥ लेप्यान्नुक्तार्द्रकं ना निंबु बुलस्य संगताये
॥२९॥ ननाध्यतारिंत्राद्रांजलंदत्वा समाहरेत् ॥ तेषामर्कमथ द्रावद्व्याकोपाय
उच्यते ॥३०॥ द्रवद्रव्यक्षेपणे संप्रोच्य्यते वा पकल्पना ॥ पिधानानि विचित्राणि ते
षामं तो न विद्यते ॥३१॥ तालपत्र जस्तूने वजासु पेयमालती भवैः ॥ पारिजातैः कृत
कीजैर्वा पिधानं समाहरेत् ॥३२॥ दुग्ध दध्ना वसेन्नक्रे क्षौद्रे तैले च सर्पिषि ॥ मत्रा

होदहतोपेच चंचेत्यादिविधानकं ॥ ३३ ॥ कांतपाषाणसत्वस्य कृतंयंत्रमनुत्तमं ॥
निष्काशयेत्सर्वथार्कं द्रवद्रव्यस्य नान्यथा ॥ ३४ ॥ अथवास्तंभकं द्रव्यं दध्नस्तु नव
नीतकं ॥ पर्पटहल्ली जलस्योक्ता मधुच्छिनुसमर्पिषः ॥ ३५ ॥ गाकंदकंगुदुग्धस्यत्तथाम
धस्य किन्वकं ॥ तैलस्य तस्य पिण्याकं सर्वेघृतस्समन्वितं ॥ ३६ ॥ यंत्रे रसो द्रवद्रव्यं यथा
स्थाली निवर्तनं ॥ तस्यतंस्थापयित्वा च द्रवे यंत्रे प्रपूरयेत् ॥ ३७ ॥ ॥ इति अर्कद्रव्ये
उदकनिक्षेपणं ॥ ॥ अक्षाद्यंगारकः पूर्णंस्थालीं दद्यादधोमुखीं ॥ तथा चार्कं पि
कः सर्वद्रवः काणं परिसृजेत् ॥ ३८ ॥ दुर्गंधिर्यभिवेदर्कः स्तंकुर्याद्द्विगंधकं ॥ सर्वेषामे
वमांसानां दुर्गंधानां च[illegible]सेचनं ॥ ३९ ॥ घनाभ्यक्ता हिंगुजीरमेथिका राजिका तथा ॥
नवीय हंडिकायां च दद्याद्धूपं पुनःपुनः ॥ ४० ॥ तत्र दद्यात्तदर्कं तु यथा दुर्गंधता व्रजेत् ॥ त
था पुनःपुनः कार्यं जायते गंधवारणं ॥ ४१ ॥ आयाति रोचकागंधो भवेत्ताद्रु हृदीपनं
॥ सर्वेष्वर्कप्रयोगेषु गंधपाषाणवासना ॥ ४२ ॥ अर्काणां तु प्रदातव्या तेभवं हस्तकं संभवाः
सर्वत्र वातरोगेषु महिषाक्षादिवासनं ॥ ४३ ॥ महिषाक्षः स्तथा रालं निर्यासिः सर्जक

स्पर्च ॥ कृष्णागरु कर्दूबं च महिषाक्षादि पंचकं ॥ ४४ ॥ सर्वेषु पित्तरोगेषु चंदनादि
कवासनं ॥ सर्वेषु कफरोगेषु जटामांस्यादिवासनं ॥ ४५ ॥ चंदनं च तथोशीरं कर्पू
रं गंधवाकुची ॥ एला कर्पूर गोहूलासपत्रेन चंदनादयः ॥ ४६ ॥ जटामांसी नखं पत्रील
वंगं तगरं रसः ॥ शिलायोगंधपाषाणः सनुमाख्यादिका अमी ॥ ४७ ॥ वायसेद्वाद
शांगे न तद्दोषं येन चार्कजं ॥ नस्यं तिपस्य धूपेन अवग्रहपिशाचकाः ॥ ४८ ॥
पंचांगागंधपाषाणास्तायेज्म हिंगुगुग्गुलुः ॥ चतुरंशां चंदनं जटामांसी च गावगी — च
॥ ४९ ॥ त्रिभागः सर्जकः सारं तावं देवहिरालकं ॥ उशीरं तु द्विभागं स्यादघं नभं एनतं
समं ॥ ५० ॥ कर्पूरा मृगनाभिश्च एकभागोऽर्कः ॥ त्रितौ ॥ एषो दशांगधूपस्तु सदा श्री
वमनोहरेत् ॥ ५१ ॥ पलांडुलशुनादीनां निर्गंधिकरणं शृणु ॥ उत्सादा तं विद्धं सम्य
कृतक्रमं ध्योविनिःक्षिपेत् ॥ ५२ ॥ पर्यायमेकमस्त्रम्लमध्ये ऽस्मान्निरसे सति ॥ तस्मा
न्निष्कास्य यान्यत्नकं कुर्यात्तच्चाष्टयामकं ॥ ५३ ॥ द्रोणपुष्पीरसेष्वेवं सर्वपत्ररसेपि

वा॥ त्रिपर्यायान्तरं तु रसानां क्षालयेत्पुनः॥५४॥ हरिद्राराजिकातोयस्थाप्यं
पर्यायमेककं॥ उष्णोदकेन संक्षाल्य पर्यायं वासयेत्ततः॥५५॥ सहस्रपत्रीपुष्पैर्वा
अभावे पल्लवैरपि॥ आलोड्य पद्मसांशेन पंचांशेन वसन्तुना॥५६॥ पुटं कृत्वा
याममात्रं स्थाप्यं पयपत्रकटाहने॥ ततो निष्कासयेदर्कं जोमारिदकं पिधानितं
॥५७॥ तस्यार्कस्य सुगंधेन एकदा मोहितो हरः॥ कुब्जानातिरसोनस्य तर्कोपमि
तिमतसो॥५८॥ एकतः सर्वरत्नार्का मांसार्कस्तु तथैकतः॥ मयास्वर्गेपि हीनस्तु
प्राप्तं तत्र च नामृतं॥५९॥ तदा प्रोक्तं शिवस्याग्रे मममधिकजीवितं प्रभोः॥ नीतावा
पत्रभुक्ता वासुधा वेदैर्मयानुसा॥६०॥ तद्दृष्ट्वा तत्र देवेशा शीरछेदं करोम्यहं॥ त
तःप्रसन्नो गिरिशो वाक्यं मां प्रति सोब्रवीत्॥६२॥ दत्तं मयामरत्वं ते देवावध्यत्वमेव
च॥ किं ते कार्यं तु सुधया सुधातोधिकरोचनं॥६३॥ इति लब्धुनार्कः॥ संप्रवक्ष्या
मि मांसार्कं मद्यस्यार्कं तथैव च॥ द्रव्याणां विजयादीनां लभ्यते यैः सुखं महत्॥६४॥ ८
मांसं तु त्रिविधं प्रोक्तं मृदुलं कठिणं घनं॥ तेषामर्कं यथा प्रोक्तं यंत्राणि क्षात्रायपच्छतेः॥

॥६४॥ मृदुलं च द्रवे मांसं चुक्रा रिंग्रां शाकं पटू॥ स्थूलखंडे कृतेनास्मिन्नू कृत्वा तक्षाल
पेज्जले॥६५॥ षष्टांशे नाष्टगंधेन नद्धि लोध्रं च निक्षिपेत्॥ रसमिश्राक्षारष्टमांशं गद
भावे पयः क्षिपेत्॥६६॥ जातीपत्रं लवंगं च त्वगेला नागकेसरं॥ मरिचं मृगनाभिश्च
पुविदुर्गंधाष्टकं त्विदं॥६७॥ कार्यं पुष्पपिधानोछामकं निष्काशयेत्ततः॥ जायते सो
महास्वादु सुधासमरसं प्रिये॥६८॥ दृढमांसस्य खंडानि लघून्येव प्रकल्पयेत्॥ द
द्याच्चतुवरीं तत्र लवणं प्रोक्षयादिशा॥६९॥ क्षारपेदारनाले तत्रिवारं कोष्णवारि
णा॥ क्षालयेत्सप्तवारं च हरेद्दकं तु पूर्ववत्॥७०॥ घनमांसस्य खंडानि कुर्याद्दतिल
घूनि च॥ आलेप्य त्रां खद्रावेण क्षालयेत्स पुनः॥७१॥ सप्तवाराणि लवणं व
पेत्सर्वविद्द्वहि॥ नद्दत्वा पंत्र मध्ये तु हरेत्सर्व वद्दकं॥७२॥ इतिमांसार्कः॥ सर्जिक्षा
रं यवक्षारं चैव तक्षारं च टंकणं॥ सौभाग्यक्षारकं सौरंक्षारं त्रां खेम वंतथा॥७३॥ अ
र्कसेहुंडपालाशक्षाराश्च तुवरीतथा॥ अपामार्गभवंक्षारं तथाष्टौ लवणानि च॥७४॥

लवणाष्टकमेतच्च सैंधवं च सुवर्चलं ॥ बिडं सामुद्रसंजानं उद्भिदं रोमकं गुडं ॥
॥७५॥ कृत्वा सर्वाणि चैकत्र निंबुनीरेण भावयेत् ॥ एकविंशतिवाराणि काचकूप्यां
विनिक्षिपेत् ॥७६॥ नखांशं निंबुरसकैः सर्वमार्द्रीकृतं तु यत् ॥ अधःस
च्छिद्रपिठरीमध्ये कूपीं निवेशयेत् ॥७७॥ मृत्कर्पटसमायुक्तां सहेदग्निं
यथाविधि ॥ तस्याग्रे कूपिकायेज्यादीर्घकंठामनोहरा ॥७८॥ सा कूपि
का जले स्थाप्या मेलयेच्च द्वयोर्मुखं ॥ जलमुष्णं यथा न स्याद्यथा चापरकू
पिका ॥७९॥ अग्नयः क्रमतो [illegible]याथामं पामं च पंच च ॥ अनेनैव प्रकारेण
क्षाराणां समुद्भवः ॥८०॥ दग्धादस्थीनि मांसानि शंखशुक्त्यादिकान्य
पि ॥ सर्वाण्यपि विलीयंते शंखद्रावस्य संज्ञायं ॥८१॥ इति शंखद्रावः ॥ ॥
पारावताजचटकशशाभ्रकेरटटिट्टिभाः ॥ क्षुद्रमत्स्यादिकाः सर्वे मांसेषु
मृदुलाः स्मृताः ॥८२॥ मृगरोहीतकाद्याश्च मत्स्याः शल्लकशंबराः ॥ एते

कठिण मांसास्युः पाक्षिणो जलचारिणः ॥८३॥ गजकुंभीरघंटाद्यास गंधा
वकराद्यः ॥ गोधागोश्वलुलायाद्याघनमांसाप्रकीर्त्तिताः ॥८४॥ अन्नादिसं
भवो योऽर्कः स्नान्मद्यंपरिकीर्त्तितं ॥ तस्यभेदान्प्रवक्ष्यामि शाठिगात्तत्समुद्धरे
त् ॥८५॥ तद्वासनानिवस्त्यर्थमिष्टगंधंप्रयोजयेत् ॥ पूर्वोक्तेधूपपत्यूपे
जयित्रेगंधवर्जितं ॥८६॥ अर्धंतत्रजलंदेयंसिद्धेदेयोष्टगंधकः ॥ तु
षोदकंपवेरामैस्सतुषैः शाकलीकृतैः ॥८७॥ गोधूमैरपिसौवीरंजा
यतेस्वल्पमादकं ॥ आरनालंतुगोधूमैरामैस्सान्निस्तुषीकृतैः ॥८८॥ धा
न्याम्लंशालिचूर्णंचकोद्रवादिकृतंभवेत् ॥ शांडकीराजिकायुक्तैस्यान्मूलं
कदलदवैः ॥८९॥ सर्षपस्वरसेवापिशालिपिष्टकसंपुनः ॥ कंदमूलफ
लादींश्चससस्नेहलवणानिच ॥९०॥ एकीकृत्वाकृतोर्कोपिस्तस्तत्क्रमेभिधी ॥

१० पने॥ इतिसूक्तं॥ ॥११॥ पक्वौषधांबुसंसिद्धोयोर्कस्तुस्यादरिष्टकं॥ अरिष्टं
लघुपाकेनसर्वत्रश्रेष्ठगुणाधिकं॥१२॥ शालिपिष्टकपिष्टादिकृतोयोर्कः
सुरानुसा॥ पुनर्नवात्रिवापिष्टेविहितावारुणीस्मृता॥१३॥ इक्षोपक्वेरसे
सिद्धःसिंधुपक्वरसेश्वसेः॥ आमेस्त्तेरेवयःसिध्यैःसचशीतरसस्मृतः॥१४॥
पर्यायावर्कभवेन्मद्यंनामसंराक्षसप्रियं॥ मंडलावर्कराजसंतनदूर्ध्वं
सात्विकंप्रियं॥१५॥ सात्विकेगीनहास्यादिराजसेस्याहसादिकं॥ तामसेतिं
घकमाणिनिद्राचमदिराच्चरे॥१६॥ भृंग्यादिमत्तद्रव्याणांयवानीपाचयो
गतः॥ अर्केनिक्षात्रायेत्धीमान्बोधकस्यान्मदस्यसः॥१७॥ धत्तूरादिकवी
जानिचक्रंपयसिनिक्षिपेत्॥ कंठशोषविबंधादिरहितोर्कोभवेत्सहि॥ १०
॥१८॥ ॥इतिलंकानाथकृतार्कचिकित्सायांअर्कभेदज्ञानकंद्वितीयः॥२॥ ॥

श्रीगणेशायनमः॥ अथातः संप्रवक्ष्यामि केवलार्कगुणान्प्रिये॥ हरीतक्याः शू
लकृच्छ्रकामलानाहनाशनः॥१॥ बिभीतकस्यतृट्छर्दिकफकासविनाशनः॥ आ
मलस्यत्रिदोषास्त्रपित्तमेहान्विनाशयेद्॥२॥ शुंठ्याविबंधामवातेशूलश्वासबला
सहृत्॥ आर्द्रकस्यज्वरंदाहंहरेद्रुच्याग्निदीप्तिकृत्॥३॥ पिप्पल्याश्वासकासामवा
तार्शोज्वरशूलहृत्॥ मरीचस्यश्वासकृमीन्हरेत्तद्वंगिदानपि॥४॥ ग्रंथिकस्यप्ली
हगुल्मकफवातोदरापहः॥ चव्यार्कौसंतरुचिकृच्छिरोषाद्रुग्जापहः॥५॥ अर्कस्तुग
जपिप्पल्यावातश्लेष्माग्निमांद्यनुत्॥ चित्रकस्याग्निकृत्श्वासग्रहणीकृमिशोथहा॥६॥
यवान्याः पाचनोरुच्योदीपनः शुक्रमूलेहृत्॥ अजमोदाद्रवोवातकफहाबस्तिशोधनः॥७॥
पारसीकयवान्यास्तुग्राहीपाचनमादनः॥ जीरकस्यतुसंग्राहीगर्भाशयविशुद्धिकृत्॥८॥
कृष्णजीरस्यचक्षुष्यागुल्मछर्द्यतिसारजित्॥ कारव्याश्चकृतोअर्केज्वरघ्नः पाचनः सरः॥९॥
धान्याकस्यतृषादाहवमिश्वासत्रिदोषहृत्॥ मिश्याज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत्॥

20

।।१०।। मिश्रेयायावह्निमांद्ययोनिशूलकृमीन्हरेत् । ज्वरामरोचकस्यापस्मारभूतत्रिदोषहृत् ।।११।।
मेथिकाया श्लेष्मवातज्वरामकफनाशनः ।। वनमेथ्याः सर्वरोगान्हरेत्कुंजरवाजिनां ।।१२।। चंद्र
शूरस्य हिक्काश्वासकृद्वातहृत्पुष्टि[illegible]वर्द्धनः ।। हिंगुनः पाचनो रुच्यो कृमिशूलोदरापहः ।।१३।।
वचायावह्निकृ वर्तिकृत्विबंधाध्मानशूलहृत् ।। मारसीकवचायास्तु भूतोन्मादबलं हरेत् ।।१४।।
कालिंजनस्य स्वरकृत्हृत्कंठमुखशोधनः ।। स्थूलग्रंथिभवश्चार्को विशोषाकफवातनुत् ।।१५।।
द्वीपांतरवचायास्तु हरेच्छूलं फिरंगकं ।। हपुषायाः समीरारोग्ग्रहणीगुल्मशूलहृत् ।।१६।। वि
डंगस्योदरश्लेष्मकृमिवातविबंधनुत् ।। तुंबरोर्गुल्माश्वासप्लीहकृच्छ्रकृमीन्हरेत् ।। वंशारो
चनजस्तृष्णाक्षयकासज्वरान्हरेत् ।।१८।। समुद्रफेनजः शीतलेपनः कफहृत्स्वरः ।। जीवको
त्थः शुक्रकफबलकृच्छितलः समः ।।१९।। आर्षभः पित्तदाहास्रकासवातक्षयापहः ।। महामेदो
द्भवार्कस्तु वृष्यस्तन्यः कफावहः ।।२०।। क्षीरकाकोलिकाजातो बृंहणो दाहवातहा ।। ऋध्याव
ल्यः स्त्रिदोषघ्नो रक्तपित्तविनाशनः ।।२१।। महामेदोद्भवः शीतो रक्तवातज्वरप्रणुत् ।। काको
ल्याः शुक्रलः शीतोपित्तशोषज्वरापहः ।।२२।। वंध्यागर्भप्रदः शीतो क्षतकासक्षयापहः ।। मधु

पथ्या केशकरः स्वर्यः पित्तनिलास्रजित् ॥२३॥ जलयष्ट्या विषछर्दितृष्णाग्लानिक्षयाप
हः ॥ कंपिल्लोथो विरेकी स्यान्मेहानाहविकारनुत् ॥२४॥ आरग्वधस्य पित्तास्रवातोदाव
र्तशूलनुत् ॥ कंड्वा मेहश्वासकासकृमिकुष्ठज्वरापहः ॥२५॥ भूनिंबस्य तृषाकुष्ठज्वरव्रणकृमि
व्रणनुत् ॥ भद्र्या वस्तु पित्तास्रकृमिविसर्पकुष्ठनुत् ॥२६॥ मदनो छर्दनेनापि चातुर्थज्वरकादि
हृत् ॥ रास्नोद्भवसमीरास्रवासशूलोदरापहः ॥२७॥ नागभिन्नोद्भवो भोगी श्लाघ्यारबुवि
कारनुत् ॥ माचिकाजस्तु पित्तास्रपक्वातीसारहा लघु ॥२८॥ तेजस्विन्याः श्वासकासकफहृद्वह्नि
दीपनः ॥ ज्योतिष्मत्या वांतिकरो वह्निबुद्धिस्मृतिप्रदः ॥२९॥ कुष्ठस्य हंत्री वातास्रकासकुष्ठम
रुत्कफान् ॥ पौष्करस्यारुचिश्वासान्विशोषापार्श्वशूलनुत् ॥३०॥ हेमाह्वायोरेकवांतिकरः कंडूवि
नाशनः ॥ शृंग्या हरेदूर्ध्ववातहिक्कातृष्णाज्वरक्षयान् ॥३१॥ कट्फलो भ्रमश्वासकासप्रमेहा
र्शोरुचिं जयेत् ॥ भार्ग्यो हरेत्कफश्वासपीनसज्वरमारुतान् ॥३२॥ पाषाणभेदजो योनिरोग
कृच्छ्राश्मगुल्महा ॥ धातकी च तृषासारविषकृमिविसर्पनुत् ॥३३॥ मंजिष्ठाजो विष
श्लेष्मरक्तातीसारकुष्ठहा ॥ कुसुंबजो वर्णकरो रक्तपित्तकफापहः ॥३४॥ लाक्षाजः कृमि

22

विसर्पव्रणोरक्षःनकुष्टहा॥ हरिद्रायामेहशोथत्वग्दोषव्रणपांडुनुत्॥३५॥ आरण्यकहरिद्रा
याकुष्टवातास्रनाशनः॥ कर्पूरकहरिद्रायासर्वकंडुविनाशनः॥३६॥ दार्व्याविशेषतोले
पान्नेत्रकर्णास्यरोगनुत्॥ रसांजनोद्भवोनेत्रविकारव्रणदोषहृत्॥३७॥ वाकुच्याः कृमि
विष्टंबपांडुशोषकफापहः॥ प्रपुन्नाटस्यहंत्येवकंडुदद्रुविषानिलान्॥३८॥ विषजोदी
प्तिकृच्चाकेकिफपित्तातिसारहा॥ जटामांसीनखपत्रीलवंगैलोध्रजः शीतलोग्राहीच
क्षुध्यःकफपित्तनुत्॥३९॥ बृहत्यत्रोद्भवोनेत्र्योदरातीसारशोषहृत्॥ भल्लातकोद्भवोह
न्यात्ज्वरोदरकृमिव्रणान्॥४०॥ गुडूच्यादीपनोग्राहीकासपांडुज्वरापहः॥ तांबूल्यामुख
दौर्गंध्यमलवातःश्रमापहः॥४१॥ बैल्वश्लेष्महरोबल्योलघुरल्पश्चपाचनः॥ कंभारिजो
भ्रमंतृष्णाशूलार्शोविषदाहनुत्॥४२॥ पाडल्याछर्दिशोषास्रतृट्दोषारुचिदाहहा॥ अ
ग्निमंथोद्भवःशोथकृमिपांडुबलासनुत्॥४३॥ श्योनाकजस्तुगुल्मार्शःकृमिहृत्रुचिदी
प्तिकृत्॥ शालिपर्ण्याक्षिनकृमीज्वरच्छर्द्यतिसारहा॥४४॥ पृष्ठपर्ण्याज्वरश्वासरक्ताती
सारदाहजित्॥ वार्तक्याज्वरवैरस्यमलारोचकशूलहा॥४५॥ जीवंसाः सारहृन्नेत्र्योदोष

स्त्रिनयनाशनः॥ मुद्गपर्णी शोषदाहग्रहण्यर्शोतिसारहृत्॥४७॥ माषपर्णी भृ-
क्रकरो वातपित्तज्वरास्रजित्॥ पंचांगुलोद्भवः शूलशिरःपीडोदरापहः॥४८॥ क्रंबुका-
ष्पी व्रणश्वासकासकुष्टाममारुतान्॥ मंदारजो वातकुष्टकंडूव्रणविषापहः॥४९॥ अर्क-
कः प्लीहगुल्मार्शःश्लेष्मोदरकृमीन्हरेत्॥ वज्रिनालेपतो हन्याद्व्रणशोथोदरव्रणान्॥५०॥
स्यातलोध्रः कफानाहपित्तोदावर्तशोथहा॥ लांगुल्या लेपतो हन्याच्छोफाशोव्रणरुक्कृमि-
नः॥५१॥ करवीरोद्भवो नेत्रकोपकुष्टव्रणापहः॥ चांडालोक्ष्यस्तु विषवन्भक्षणे लेपने
स्वहत्॥५२॥ धत्तूरजो हरेल्लेपाद्यूकाकृमिविषादिकं॥ वासोद्भवो ज्वरछर्दिमेहकुष्टक्ष-
यापहः॥५३॥ पर्पटो हंति पित्तास्रभ्रमतृष्णाकफज्वरान्॥ निंबजः श्रमतृट्कासः ज्वरा-
रुचिवमिव्रणुत्॥५४॥ महानिंबोद्भवो गुल्ममूषकाविषनाशनं॥ पारिभद्रोनिलश्ले-
ष्मशोथार्शमेदकृमिप्रणुत्॥५५॥ कांचनारो गंडमालागुदभ्रंशव्रणापहः॥ कोविदार-
स्तु पित्तास्रप्रदरक्षयकासहा॥५६॥ शोभांजनाख्यो रुचिकृत्सुक्लोग्राहिदीपनः
॥ मधुशिग्रुभवो हन्याद्विद्रधिश्वयथु[illegible]पकृमीन्॥५७॥ शिग्रुजो विषहृन्नेत्र्यो

१२ वसेन्नस्याच्छिरोनिर्वृतं ॥ गिरिकर्ण्याः कुष्ठतूलं शोथव्रणविषापहः ॥५८॥ सिंधुवारोद्
वो हंति शूलशोथाद्यमारुतान् ॥ निर्गुंडुत्थ कोहिरेज्जंतुव्रणकुष्ठारुचिर्विषं ॥५९॥ कोटजोदीप
नः शीतः कफतृष्णामकुष्ठजित् ॥ कारजः कफगुल्मार्शोव्रणकृमिकफापहः ॥६०॥ घन
कारंजकोभेदीनानार्शः कृमिकुष्ठजित् ॥ करंज्यावमिवालार्शः कृमिकुष्ठप्रमेहजित् ॥६१॥
उच्चटार्कः कराकरोवातपित्तकफापहः ॥ गुंजायाहरतेश्वासमुखशोषभ्रमज्वरान् ॥६२॥
कपिकच्छूद्भवो वृष्यो बृंहणो वाजिकमकृत् ॥ मांसरोहिण्युद्भवस्तु वृष्यो दोषत्रयापहः
॥६३॥ चेल्हः कुर्याद्धातुपुष्टिं नफलान्मारयेज्जनान् ॥ कंटकार्यादीपनश्च श्लेष्मादरुजं जये
त् ॥६४॥ वेतसार्को हरते दाहं शोथार्शोयोनिरुग्व्रणान् ॥ जलवेतसजो ग्राही शीतवातप्रकोपनः
॥६५॥ जलजार्कस्तु हरते चराचरविषं स्फुटं ॥ अंकोटकस्य मूलाम शोषग्राहविषापहः ॥
॥६६॥ बलार्केग्राहि वातास्रपित्तास्रक्षतनाशनः ॥ अतिपूर्वबलार्कस्तु मूत्रातीसारनाश
नः ॥६७॥ महाबलार्को हरते कृच्छ्रं वातानुलोमनः ॥ नागपूर्वबलार्कस्तु मूर्च्छामोहहरः प १२
रः ॥६८॥ लक्ष्मणार्कं मासेवेन वंध्यापि लभते सुतं ॥ स्वर्णवर्ण्याश्शिरः पीडां त्रिदोषान्हंति दु

२९

घ्नः॥६९॥ कार्पास्यर्कः कर्णसंस्थः कर्णरोगान्विनाशयेत्॥ काशजः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित्॥७०॥ नद्यार्कोबिस्तियोन्मार्त्तिदाहपित्तविसर्पहृत्॥ पानाऽज्ञपे ज्वरच्छर्दिकुष्ठातीसारहृद्रुजः॥७१॥ श्वेतत्रिवृद्भवोर्कः पित्तशोथोदरापहः॥ शरपुंखोद्भवः प्लीहगुल्मव्रणविषापहः॥७२॥ जवाजोऽर्कोमदभ्रांतिपित्तास्रकुष्ठकासजित्॥ मुंडिजोर्स्यं तबलकृत्प्लीहमोहानिलार्तिजित्॥७३॥ अपामार्गभवश्छर्दिकफमेदोनिलापहः॥ आरक्तापामार्गभवो धातुस्तंभनकारकः॥७४॥ कोकिलाक्षभवः शीघ्रं सेकाच्छोथान्निवारयेत्॥ अस्थिसंहारिकायास्तु भग्नसंधानकृच्छुचिः॥७५॥ कुमारिकायाग्रध्याग्निदग्धविस्फोटकान्जयेत्॥ पुनर्नवायाः श्वेतायाः सर्वनेत्रामयापहः॥७६॥ पुनर्नवारक्तायाग्राहिपित्तास्रनाशनः॥ भृंगराजस्य हंसकेकेशास्वच्यः शिरोर्तिहृत्॥७७॥ प्रसारिण्या वातहरो वृष्यः संधानकृत्सरः॥ सारिवाया वह्निमांद्यकासामविषनाशनः॥७८॥ शणपुष्पीलतायास्तु अर्कः पित्तकफान्तकः॥ त्रायसर्कः शूलविषविलेपी ज्वरनाशनः॥७९॥ मूर्वाया मेहहृद्रोगकंडूकुष्ठज्वरापहः॥ काकमाच्यानेत्रहीनच्छर्दिहृद्रोगनाशनः॥८०॥ काकनासाभवोवाऽर्कः शोथार्शः श्वित्रकुष्ठ

हृत् ॥ काकजंघोद्भवोदन्याज्वरकंडुविषकृमीन् ॥८१॥ नागिन्यास्तु हरेच्छूलं योनिदोषवमी
कृमीन् ॥ मेषशृंग्याः श्वासकासव्रणश्लेष्माक्षिशूलहा ॥८२॥ हंसपाद्या हरेल्लूतांभूतरक्तवि
षव्रणान् ॥ सोमवल्याःस्त्रिदोषघ्नः सौरकश्चरसायनः ॥८३॥ आकाशवल्याः शीतोर्कः पित्त
श्लेष्मामनाशनः ॥ पातालगरुडीजातोर्को वृष्यः पवनापहः ॥८४॥ वंदाकृत्सोद्भवोर्कस्तु विष
रक्षोव्रणापहः ॥ वटपत्रभवश्चोष्णो योनिमूत्रगदापहः ॥८५॥ हिंगुपत्र्याविबंधार्तिश्लेष्मगु
ल्मानिलापहः ॥ वंशपत्र्याः पाचनोष्णो हृद्बस्तिगदसंघहृत् ॥८६॥ मत्स्याक्ष्यर्कोग्राहिशीतकु
ष्ठपित्तकफास्रजित् ॥ सर्पाक्ष्यारोपणः सर्पवृश्चिकोंदुरदंशकान् ॥८७॥ शंखपुष्प्या विषहरः
स्मृतिकांतिबलाग्निदः ॥ अर्कपुष्प्या कृमिश्लेष्ममेहपित्तविकारजित् ॥८८॥ लज्जालुकायाभे
गरुकृरक्तपित्तातिसारजित् ॥ अलंबुषासंभवोर्कः कृमिपित्तकफापहः ॥८९॥ वृश्चिकायाः कफ
हरो वृष्यस्तंभी कृमिप्रणुत् ॥ भूम्यामल्याः कामलतृषाकफपांडुक्षयापहः ॥९०॥ ब्राह्मीबुद्धि
प्रदः श्वार्कः षण्मासाभ्यासतः कविः ॥ ब्रह्ममंडूकिकापांडुविषशोषज्वरान्हरेत् ॥९१॥ द्रोणपुष्प्या
ज्वरश्वासकामलाशोफजंतुजित् ॥ सर्पमुख्या हरेत्स्फोटयोनिरुक्कृमिपांडुतां ॥९२॥ वंध्या

कर्कोटकी ज्ञान: सर्पदर्पव्रणापहः ॥ मार्कंडिकाया दुर्गंधविषगुल्मोदरापहः ॥ १३ ॥ देवदाल्या
शूलगुल्मश्लेष्मार्शोवातजित्परं ॥ पत्तूरजो ग्राहि हि मो वह्निकृद्व्रणदाहहा ॥ १४ ॥ गोजिह्वायामेह
कासव्रणसारज्वरापहः ॥ नागपुष्प्यासर्पविषसर्वग्रहनिवारणः ॥ १५ ॥ वेल्लंतरो मूत्रघाताश्म
री योन्यनिलार्तिजित् ॥ छिक्कन्यावह्निरुच्चिकृद्दर्शकुष्ठकृमिव्रणनुत् ॥ १६ ॥ कोकुंदरो ज्वरं रक्तं मु
खशोषकफं हरेत् ॥ सुदर्शनार्कश्वासघ्नकफशोफास्रवातजित् ॥ १७ ॥ ॥ इति तैलंकानाथ
रावणकृतार्कगुणकथनं तृतीयप्रकरणकं ॥ ॥ सिताचिंचोषणषट् बिभीतककटिलुका:
॥ एतत्षडु समिलुक्तं विपरीतबलाधिकं ॥ १ ॥ एषामर्कं प्रस्यहं पः पिबेत्पलयुगं प्रियं ॥ अरु
चिं चैव मंदाग्निं स्वप्नेपि न स पश्यति ॥ २ ॥ उन्मत्तसोमबीजाय जातिपत्री च रवाक संगुन्म
तपंचकं चैतद्यवानी पंचनिःसमा ॥ ३ ॥ दुग्धनिर्वापितादस्मादर्कोग्राह्योयथोक्ततः ॥ रवा
दे सिद्धान्चवन्मत्तोरमेच्चरमणीशतं ॥ ४ ॥ त्वगेलापत्रकैस्तुल्यैस्त्रिसुगंधमितिस्मृतं ॥ तदर्को
मुखदौर्गंध्यच्छेदनो मलभेदनः ॥ ५ ॥ नागकेसरमेला च पत्रकं च रुचीर्णकं ॥ चातुर्जातमि
दं वर्ण्यं वह्निकृच्चविषापहं ॥ ६ ॥ पथ्याबिभीतं धात्री त्रिफले यं तदर्कोत्तिना ॥ एतदर्को मेहकुष्ठ
को

28

विषमज्वरपित्तनुत्॥७॥ विश्वोपकुल्यामरिचंत्रयंत्रिकटुमुच्यते॥ मरुद्गुल्मकफस्थौल्यमेतत्
श्लीपदनाशनं॥८॥ पिप्पलीपिप्पलीमूलंमरिचंविश्वभेषजं॥ चतुरूषणमित्युक्तमेतदर्कोग्निकृ
त्परः॥९॥ पिप्पलीपिप्पलीमूलंचव्यचित्रकनागरैः॥ पंचकोलमिदंप्रोक्तंप्लीहानाहोदरा
पहं॥१०॥ कणामूलोषणकणाचव्यचित्रकनागरैः॥ एतत्षडूषणंप्रोक्तंदीप्तिकारीविषा
पहं॥११॥ मेथिकाचंद्रसूरश्चकालाजाजीयवानिका॥ चतुर्बीजमिदंप्रोक्तंशूलाध्मानसमी
रजित्॥१२॥ जीवकर्षभकौमेदेकाकोल्यौऋद्धिवृद्धिके॥ अष्टवर्गोयमर्कस्तुभग्नसंधानकृ
त्परः॥१३॥ बिल्वोग्निमंथःश्योनाकःपाटलागणिकारिका॥ पंचमूलंबृहत्प्रोक्तंतदर्कोग्नि
ग्निदीपनः॥१४॥ शालिपर्णीपृष्ठपर्णीवार्ताकीकंटकारिका॥ गोक्षुरःपंचमूलंस्यात्तदर्क
श्वाशमरीप्रणुत्॥१५॥ उभाभ्यांपंचमूलाभ्यांदशमूलमुदाहृतं॥ तदर्कःसूतिकारोगत्रिदोष
ज्वरशोथहा॥१६॥ जीवंतीमधुकंमुस्ताशालिपर्ण्यष्टवर्गकः॥ जीवनीयगणस्यार्कःसर्वरो
गविनाशनः॥१७॥ कर्पूरोमृगनाभिश्चकर्पूरलतिकातथा॥ गंधमार्जारवीर्यंचश्रीखंडं.
पीतचंदनं॥१८॥ कालीयकंरक्तकांगपतंगमगरुद्वयं॥ देवदारुश्चसरलस्तगरंपद्मकं १५

पुरः ॥१९॥ सरानिर्यासिकोशालं दुंदुरुश्च शिलारसः ॥ सिल्हकश्च लवंगं च आतिपत्री फलं
तथा ॥२०॥ एलाद्वयं दारुचिनी त्वक्पत्रं नागकेसरं ॥ वालकं वीरणं मांसी कुंकुमं रोच
नं नखं ॥२१॥ सुगंधवीरणं वालं जटामांसी मुरा घनः ॥ शुंठी कस्तुरएकांगी सुगंधाद्यं गणो
मतः ॥२२॥ विधिनिष्कासितो ग्राह्यः कोष्ठ्यः पाचनदीपनः ॥ मुखदौर्गंध्यहृन्नेत्र्योलेपाम्मेहः
श्रमापहः ॥२३॥ कुशकाशाश्च दर्भश्चिकदृतृणं भूतृणं तथा ॥ श्वेतदूर्वा नीलदूर्वा गंडदूर्वेति वीर
णा ॥२४॥ वीरणा कोहरेच्छूलं संधुक्षयति चानिलं ॥ क्षतसंधानकृद्वृष्यो बल्यं कुर्यादिनेक
धा ॥२५॥ अश्वगंधा च मुसली विदारी चशतावरी ॥ क्षीरवाराहिका चेति दुग्धकंदगण
स्त्वयं ॥२६॥ बालकोवर्धते वीर्ये रिरंसु बालया सह ॥ एतद्दकस्य पानेन कन्या षोडशवार्षि
की ॥२७॥ लघुदंती बृहद्दंती इंद्रवारुणि नीलिका ॥ वासये च सुगंधेन राजयोग्यं विरेचनं ॥
२८॥ दुग्धभिन्ने वटफलैः कमलानां पिधानतः ॥ जाबोकोशीतलो ग्राही वण्णाभिगसुगं
धिकृत् ॥२९॥ मूलनालदलोस्फुटोफलैर्युक्तानि पद्मिनी ॥ तस्मिधानं पिप्पलस्य फला
नां यानि दोषनुत् ॥३०॥ च्यूतकमंडलं बीजं स्थलपाद्मिनिपिहि पत्रापिहितं चेत् ॥ उष्णस

३०

नर्का

सं

६ सम्यगर्कमंडलमेकसमरणीयात्॥३१॥चतुर्दिनंगेयालल्लनापिबतिकुचस्तंभनंकुरुते॥
गर्भंतुभीनिरहितामयतुपुनःकुलप्रसूतापि॥३२॥बल्यश्चयस्थोभयेन्नंदीपिहितःकुमुदस्य
च॥कुपोदकीनरकस्यपानाल्लेनपवेदनं॥३३॥न्यग्रधोदुंबरोश्वत्थोपारीशाप्लक्षपादपाः
॥पंचैतेक्षीरिणोवृक्षास्तेषामकैव्रिणुव्रणुत्॥३४॥मेदोघ्नास्नानतोलेपाद्विसर्पानियनाशा
नाः॥शोथघ्नस्तस्यसेकेनभग्नसंधानकंभवेत्॥३५॥शेवंतीशतपत्रीचवासंतीगुलदाव
दी॥चमेलीयूथिकाचंपाबकुलश्चकदंबकः॥३६॥छादयेकेतकीपत्रेगाथाकोगुरुमा
गतः॥पुष्पार्कइतिख्यातोमरिचेसहितंपिबेत्॥३७॥मंडलेकप्रयोगेणकुंबीपिपुरु
षायते॥वर्षाधिकंतुयक्ष्माणंहन्याछ्रेष्टमृगांकतः॥३८॥वत्सनाभश्चहारिद्रःसौक्तिक
श्चप्रदीपनः॥सौराष्ट्रिकःसौक्तिकश्चकालकूटहलाहलाः॥३९॥ब्रह्मपुत्रस्त्वमिख्या
ताविषभेदास्तदर्किताः॥लेपेनगंडमालाद्यावातरोगाःप्रयांतिच॥४०॥रक्तशालिःसक
मलःपांडुकःसकुनाहूतः॥सुगंधकःकर्दमकोमहाशालिश्चदूषकः॥४१॥पुष्पांडकःपुं १६
डरीकस्तथामहिषमस्तकः॥दीर्घशूकःकांचनकोहायनोलोध्रपुष्पकः॥४२॥इत्याद्याः

३१

तुरी चवळ्या खाद वाटाणे

न्नालयः संति बहवो बहुदेशजाः ॥ तासांपि छंयथालाभं क्षिपेदष्टगुणे जले ॥ ४३ ॥ यावज्जी
वसमुत्पत्तिर्जीवानां विलयस्तथा ॥ ततो दत्वार्कयंत्रेन मध्यं निष्काशयेत्सुधीः ॥ ४४ ॥ स्वादुर्मम
द्वीग्राहिणी च बलदा ज्वरहारिणी ॥ नानादुःखहरा स्निग्धा नासुर्माद्रास्त्रिदोषजित् ॥ ४५ ॥
मुद्गमाषौ राजमाषा निष्पावश्च मकुष्टकः ॥ चणकाढकि मैंगल्या त्रिपुटश्च कुलैपकाः ॥ ४६ ॥
द्विदलीकृत्य विदुषा तत्तच्चूर्णीकृता पुनः ॥ पूर्ववत्साधयेन्मध्यं तुषधान्यसमुद्भवं ॥ ४७ ॥ मासो
वाकुरुते दोषान्नयनास गुणांस्तनान् ॥ भूमिस्थमथनाद्भूर्ध्वं तनुते गुणसंततीं ॥ ४८ ॥ विण्मूत्र
रोधमाध्मानत्रिदोषोन्मत्तता रुजः ॥ शिरोजठरजंघासु प्राणानपि विनाशयेत् ॥ ४९ ॥ ईषन्मद
करं स्निग्धं हरेत्सूर्वादिनामगदं ॥ संवास्येस च बाणमुद्दीपयन्ति च्चानलं ॥ ५० ॥ तिलातसी च
तौरी च त्रिविधश्चापि सर्षपः ॥ द्विधाराजीखारवसंच बीजं कोसुंभसंभवं ॥ ५१ ॥ एतानि तै
लधान्यानि शाठितानि च पूर्ववत् ॥ ततो निष्काशयेद्दक्कीगंधपाषाणवासितं ॥ ५२ ॥ विलेपितो
रोमरोगाश्च रकुंजरवाजिनां ॥ हरेसेवनसंदेहसर्जिक्षारसमन्वितः ॥ ५३ ॥ सर्वेषु कर्णरोगे
षु बाधिर्ये कर्णपूरणं ॥ अनेन घर्षयेच्छ्वेतं नेत्रांजनसमाचरेत् ॥ ५४ ॥ कंगुपुष्पं जलस्त्रावं य

१७ क्ष्मि रोगं व्यपोहति ॥ अभ्यंगाद्दद्रुकुष्ठं च हरेत्त्वच्यं च केशकृत् ॥ ५५ ॥ माक्षिकं भ्रामरं क्षौद्रं
पौत्तिकं छात्रमित्यपि ॥ दाघ्रमौद्दालकं द्दालमित्यष्टौ मधुजातयः ॥ ५६ ॥ पौंड्रको भीरुकश्चा
पि वंशकः शतपोरकः ॥ कांतारस्तापसेक्षुश्च काष्टेक्षुः शुचिपत्रकः ॥ ५७ ॥ नेपालो दीर्घ
पत्रश्च नीलपोरोथ कोशकृत् ॥ एते द्वादशसंख्याताइक्षूणां जातयः स्मृताः ॥ ५८ ॥ फाणितं
चैव मत्स्यंडी गुडः खंडकमेव च ॥ सितासीतापलाचैते षड्इक्षुजामताः ५९ ॥ आम्रआ
म्रातको धात्री लकुचं च कपित्थकं ॥ नारिंगं द्विविधं जंबु करमर्द पियारिकं ॥ ६० ॥ दाडिमं पर्व
तद्राक्षा द्विधा बदरंतूदकं ॥ बीजपूरं च जंबीरं निंबुकं चाम्लवेतसं ॥ ६१ ॥ वृक्षाम्लं हरिसंभं
च चांगेरीत्यम्लवर्गकः ॥ शुंठी कणा कणामूलं यवानी मरिचानि च ॥ ६२ ॥ तुल्यान्येतानि सर्वा
णि एतद्विघ्रोत्थजो रसः ॥ प्रोक्तानंगतिदिक्कानां साटसंख्यानवैवान्मिता ॥ ६३ ॥ सर्वेभ्यो द्वि
गुणाकार्यास्यापघे मासमात्रकं ॥ कुर्यादिष्टमहरिकं प्रमहं च ततः पुनः ॥ ६४ ॥ ततो निष्काशे
येदर्कं सुरेयं राजवारुणी ॥ मासंभूमौ निखातव्यानतउघटसभक्ष्ययेत् ॥ ६५ ॥ मध्यामहश्चैव
रमुखाभ्युत्तातस्मै समर्पिता ॥ जेनदत्ता भैरवेभ्यो लल्लुज्जिह्वाः पिबंति ते ॥ ६६ ॥ इयंरीता १७

लघुस्वाद्वी स्निग्धाग्राही विलेखनी॥ चक्षुष्यादीपनी स्वर्या व्रणशोधनरोपणी॥६७॥ सौकुमार्यकरा सूक्ष्मा परं स्रोतोविशोधनी॥ कषायानुरसा हृद्या प्रसादजनका परा॥६८॥ कर्णमैथुकरा वृष्या विशदा रोचना हरेत्॥ कुष्टार्शः कासपित्तास्रकफमेहकृमीन् हरेत्॥६९॥ मेदस्तृष्णा वमिश्वासहिक्कातीसारविग्रहान्॥ दाहस्तनक्षयाल्लेयं योगवान्ह्यल्पवातला॥७०॥ कंगुचीनाकोद्रवश्च श्यामाको वनकोद्रवः॥ शरबीजं वंशबीजं गवेधुश्च प्रसाधिका॥७१॥ यावंसेना निचोक्तानि तुषधान्यानि वैदश॥ सर्वं संकुच्य यत्नेन वितुषीकृ सयत्नतः॥७२॥ नक्रे वाक चिदम्ले वा आकीटं नद्धि निक्षिपेत्॥ ततो निष्काशयेन्मद्यं भवेत्साक्षुद्रवारुणी॥॥७३॥ मंडलोर्ध्वंतु भोक्तव्या बहुक्लेशकरैर्नरैः॥ क्षुधातृषा च चिंता च पर्वतारोहणादिकान्॥७४॥ एतत्संसेवितो नास्ति महाभारवहोपि च॥ स्नातास्यामुपविष्टा चेज्जपेत्प्रसन्नवेदना॥७५॥ हरिणेणकुरंगुर्ष्यपृष्टतन्यंकुरांबराः॥ राजीवापि च मुंडी चेत्साद्यापंबलसंज्ञकाः॥७६॥ एषां मांसं तु कणशः कृत्वा पूर्वद्रवे क्षिपेत्॥ संस्थाप्य मंडलं पश्चाद्दर्के निष्काशयेत्ततः॥७७॥ एवं सर्वत्र मांसस्य वारुणीकरणक्रिया॥ पित्तश्लेष्महरा किंचि

१८ श्चानुला बलवर्धिनी ॥ ७८ ॥ गोधाशशभुजंगाखुशल्लकाद्या बिलेशया ॥ एतत्सुरा वातह
रा बृंहणा बद्धमूत्रविट् ॥ ७९ ॥ सिंहव्याघ्रवृकाऋक्षतरक्षुद्वीपिनस्तथा ॥ बभ्रुजंबुकमा
र्जारौ इत्याद्यास्तु गुहाशया ॥ ८० ॥ स्निग्धो बल्यो हितो नित्यं नेत्रगुह्यविकारिणं ॥ वानरो
वृक्षमार्जारो वृक्षमर्कटकादयः ॥ ८१ ॥ एते पर्णमृगाः श्वाकेशिष्या नेत्ररोगिणां ॥ श्वासा
र्शःकासशमनो अस्तकृन्मूत्रपुरीषकाः ॥ ८२ ॥ वर्तिकालावगीरिकाकाकपिंजलतित्तिराः
॥ कुलिंगकुक्कुटाद्याश्च विकिराः समुदाहृताः ॥ ८३ ॥ बल्यो वृष्यः त्रिदोषघ्नो एतद्दर्के तु प
थ्यलाः ॥ हरितो धवलाः पांडुश्चित्रपुच्छो बृहच्छुकाः ॥ ८४ ॥ पारावतः खंजरीटः पिकाद्याः
प्रतुदाः स्मृताः ॥ कफपित्तहरो ग्राही बद्धविण्मूत्रको भवेत् ॥ ८५ ॥ काकोगृध्रउलूकश्च
पित्तलः शशघातकः ॥ चाषो भासश्च कुक्कुट इत्याद्याः प्रसहास्मृताः ॥ ८६ ॥ एतत्सुराभ
स्मकरा तस्मान्मेदस्विनो हिताः ॥ कालीपुच्छागगोमेषहयाद्या ग्राम्यसंज्ञकाः ॥ ८७ ॥ दी
पनो वातहृत् पित्तो बृंहणो बलवर्धनः ॥ हंससारसकाचाक्षबककौंचशरारिका ॥ ८८ ॥ नदी १८
मुखीसकादंबाबकोलाद्याः प्लवास्मृताः ॥ एतन्मद्यं शुक्र बलकरं स्निग्धं त्रिदोषहृत् ॥ ८९ ॥
मूलायगंडवाराहचमरीवारणादयः ॥ ९० ॥ कूलेचराएतद्दर्को वृष्यः श्लेष्मविवर्धनः ॥

शंखंशंकनकश्चापि शुक्तिशंबूककर्कटाः ॥ एते कोशस्थिताश्चार्के बृंहणो बलवर्धनः ॥ ९१ ॥
कुंभीरकूर्मनक्राश्च गोधाम[illegible]करशंकवः ॥ घाटिकः शिशुमारश्च इत्याद्याः पाटिनस्मृता ॥ ९२ ॥
पदिज्ञातासुरावात हंत्री स्निग्धा विशेषतः ॥ मत्स्यो मीनो विसारश्च भूपो वैसारिणो हृतः ॥
॥ ९३ ॥ शकलीपृथुरोमा च रोहितश्च सुदर्शनः ॥ एते मत्स्या एतद्दकौ रोचको बलवर्धनः ॥
॥ ९४ ॥ नमत्स्याकैतु निष्काद्य नानापुष्पैस्सुवासितं ॥ यः सेवयेन्मासषट्कं वलीपलितव
र्जितः ॥ ९५ ॥ मनुष्यमांसजार्केतु मासषट्कं तु सेवयेत् ॥ नक्रामते शारीरस्य सपाद्याद्विवि
षंक्वचित् ॥ ९६ ॥ त्वगेलामरिचं चंद्रो लवंगं जातिपत्रकं ॥ दत्वाउनामुपरि तो घृतं विंश
तिभागिकं ॥ ९७ ॥ अंडोकोपि स्वगुणकृद्दृष्यो वा नघ्रशुक्रलः ॥ निंबाम्राकुरसंभूतो
वसंते ग्रीष्मके पुनः ॥ ९८ ॥ सेवंती शतपत्री जो वर्षायां त्रिफलाभवः ॥ पारिजातकका
श्मीरिजातोर्कः शरदि स्मृतः ॥ ९९ ॥ यवानीगुलकृद्वयो हेमंते शिशिरे पुनः ॥ यवानीदे
ज्यपः सेवेत्सर्वरोगभयंकृतः ॥ १०० ॥ ॥ इति लंकानाथकृतार्कचिकित्सानानाओ
षधीवर्गार्कविधानंशतकं ॥ चतुर्थं ॥ ॥ ज्वरागमनवेलायां घृतार्कं मरिचान्वितं ॥

रत्ना

पलद्वयंपिबेद्यस्तुज्वरःसंस्तंभितोभवेत्॥एकविंशतिवाराणिकदल्यर्केणभावितं॥चू
र्णंतालंमुनिमितंदिना छीतज्वरंहरेत्॥२॥मेथीममषेतुलसीकालामलत्वलवंगकैः॥भू
निंबार्कउसभ्ननिवापोमोक्तिकाक्ष्याः॥३॥मारितस्यप्रवालस्यममरवींज्वरनाशनः॥
सुरजीर्णगुडाजाज्योनिहंतिविषमज्वरान्॥४॥अर्कस्तुदशमूलानांलवंगमरिच्या
न्वितः॥सन्निपातंहरेच्छीघ्रंमुपलाभस्मशायिनं॥५॥श्रृंगवेरंनागरंचभग्नमेरंडजे
द्रवे॥पययानिर्गतार्कस्तुहरेदामातिसारकं॥६॥धानक्याम्रा[illegible]बिल्वानिलोध्रे
द्रयवजोयहा॥पर्यायमाहिषंतक्रेनदर्केपक्कसारहा॥७॥वत्सत्वकूदाडिमत्वकूचसा
धितोमधुनान्वितः॥दधिभक्ताशितोकोर्यिरक्तातीसारनाशनः॥८॥धातकीबदरीप
क्ककपित्थरसमाक्षिकं॥लोध्रंदधिप्लुतंचार्कःप्रवाडीनाशनःपरः॥९॥तक्रनिर्वापितामु
द्रास्तदर्केधा[illegible]न्यजीरकैः॥सैंधवेनसमायुक्ताहन्यात्संग्रहणीगदं॥१०॥एकविंशति
वाराणिगेरूचूर्णंविभावितं॥छिकन्यर्केणतद्धन्यात्शसितेनप्रजापिनः॥११॥ॐकेकर
केणसकोणकेचितंकठीनांइहि कठिनाहिजोजानेनकरेगोत्रनहोहरीया॥वेणी

37

वेणीचेणीयेणीमहोदरीकुकुरारक्तारीसापिनरीसाभूतस्वरितारजनीताह
मीविद्यायेप्रकाशंतितेनराजीवंतेवर्षशतंहमविद्यायेनप्रकाशंतितेनराचगु
दृश्याब्रह्मदोषीभवंतुकारीविकारीअभिचारीविनोदायेपठंतियेसुनंतितेक्
रेगोत्रनेहाहरीषा॥१४॥तीक्ष्णादुग्धार्कैणभाव्यंशांखद्रावेणपर्वयं॥सूत्रंत
नटृढंबध्वाचर्मकीलापनंतितं॥१५॥शुंठीपथ्यादाडिमत्वकुसगुडवारुणी
कृता॥सोषणीसाद्विपलिकाजोक्रामदाग्निनाशिनी॥१६॥पंचकोलंशिवा
जाजीमरिचंचाम्लभावितं॥तद्वर्कोहरतिक्षिप्रंदुर्निवारांविसूचिकां॥१७॥यवा
न्यकोमिस्तुपुल्कः षट्कंमत्ताभ्यांविलोडितः॥गंधपाषाणधूपेनवासितेजीर्णना
शनः॥१८॥शुंठीकालाजाजनंचाम्लभावितंतस्पचार्कतः॥पटुपुक्ताहरेच्छीघ्रंवि
षमाग्निंचनाशयेत्॥१९॥दुग्धेदधिघृतंमूत्रंपललेमहिषाद्भवं॥भुक्तातद्वर्को
भुंजीतकुर्वनंभस्मकाग्निकृत॥२०॥खुरासनेयवानिंचकुबेराक्षोविडंगकं॥

38

२० व्योषश्चैषो कृतोर्कोवा ह्यग्निमंथस्य जंतु हृत्॥२१॥ रसेंद्रेण समायुक्तश्चार्को
धत्तूरपत्रजः॥ नागवल्लिभवोवा पिप्पकालीक्षो विनाशनः॥२२॥ खा दूर्यापां वा गृहे
वापि हरितालार्क लेपनात्॥ मत्कुणमक्षिका सर्पा नश्यं क्षापांनित्रक्षणात्॥२३॥ नक्ते
दत्वा पलाशस्य बालान्यर्कं समाहरेत्॥ तद्वृक्पानात्कफजं कृमीनां नाशनं भवेत्॥२४॥
